# चतुर्दशः पाठः
# श्रवणकुमारस्य कथा

Q4X691



पितृभक्तः श्रवणकुमारः एकः बालकः आसीत्। सः सदा पित्रोः सेवां करोति स्म। तस्य पितरौ नेत्रहीनौ आस्ताम्। एकदा तस्य पितरौ अवदताम् – वत्स आवां तीर्थयात्रां कर्तुम् इच्छावः। श्रवणकुमारः पित्रोः आज्ञां परिपालनार्थं एकस्यां वहनिकायां पितरौ स्थापयामास। सः तौ स्कंधे धृत्वा तीर्थयात्रायै प्राचलत्। मार्गे तस्य पितरौ पिपासितौ अभवताम्।

श्रवणकुमारः पिपासितयोः पित्रोः क्षुधाशान्त्यर्थं एकस्य वृक्षस्य छायायां तौ संस्थाप्य जलम् आनेतुं सरयूम् अगच्छत्। सः जलतुम्बिकां नद्याः जले निमज्जितम् अकरोत्। जलस्य भरणावसरे तुम्बिकायाः ''गड़गड़'' इति ध्वनिः अभवत्। तदा आखेटार्थं समागतः राजा दशरथः तं ध्वनिम् अश्रृणोत् अचिन्तयच्च। नूनं कश्चित् गजकलभः जलं पिबति। सः शब्दवेधी बाणं प्राक्षिपत्। बाणः श्रवणस्य हृदयम् अछिनत्।

बाणेन आहतः श्रवणकुमारः चीत्कारशब्दम् अकरोत्। तत् श्रुत्वा दशरथः तं प्रति अधावत्। सः तत्र बाणविद्धं श्रवणं दृष्ट्वा शोकाकुलः अभवत्। बाणविद्धः श्रवणकुमारः दशरथम् अवदत् मम अन्धौ पितरौ पिपासाकुलौ वृक्षस्य अधः तिष्ठतः। त्वं शीघ्रं गत्वा तौ जलं पायय। एवं कथयन् सः प्राणान् अत्यजत्।

शोकाकुलः दशरथः जलतुम्बिकां नीत्वा श्रवणस्य मातापित्रोः समीपम् अगच्छत्। तौ अपृच्छताम् वत्स! विलम्बः कथं जातः ? आवां पिपासापीडितौ त्वम् उत्तरं देहि। दशरथः सर्वां घटनां न्यवेदयत्।

तत् श्रुत्वा तौ वृद्धौ तम् अशपताम्। यथा आवां पुत्रवियोगे प्राणान् त्यजावः तथैव त्वमपि पुत्र–वियोगे प्राणान् त्यक्ष्यसि। एवं विलपन्तौ दिवं गतौ। महाराजो दशरथः अतीव उदासीनो अभवत्। सः श्रवणकुमारस्य तयोः पित्रोश्च दाहसंस्कारं कृत्वा प्रत्यावर्तत्।

## शब्दार्थाः

धृत्वा = धारण करके। जलतुम्बिकाम् = पानी की तुम्बी को। बाणं प्राक्षिपत् = बाण चलाया। अछिनत् = बींधा। तूष्णीम् = चुपचाप। अशपताम् = शाप दे दिया। पिपासितो = प्यासे। आनेतुम् = लाने के लिये। गजकलभः = हाथी का बच्चा। पायय = पिला दो। मुहूर्मुहुः = बार–बार। त्यक्ष्यति = तू छोड़ेगा। प्रत्यावर्तत् = लौट गया।

## अभ्यासः

**प्रश्न 1. संस्कृत में उत्तर दीजिए –**

(क) श्रवणकुमारः पितरौ कुत्र उपावेशयत् ?

(ख) श्रवणकुमास्य पितरौ कीदृशौ आस्ताम् ?

(ग) श्रवणकुमारः जलम् आनेतुं कुत्र अगच्छत् ?

(घ) कः बाणेन श्रवणम् अविध्यत् ?

**प्रश्न 2. निम्नांकित पदों के अर्थ लिखिए –**

पिपासितौ, तूष्णीम्, मुहुर्मुहुः, प्रत्यावर्तत।

**प्रश्न 3. संस्कृत में अनुवाद कीजिए –**

(क) श्रवणकुमार आज्ञाकारी था।

(ख) उसने माता–पिता की आज्ञा का पालन किया।

(ग) उसके माता–पिता प्यासे थे।

(घ) श्रवणकुमार जल लाने सरयू नदी गया।

(ङ) दोनों ने पुत्र वियोग में प्राण छोड़ दिये।

Q572AN